कं। ननु लिङर्थइष्टसाधनत्वादेः कुत्रान्वयः तत्राह। नत्वादि। लिङर्थेष्टसाधनत्वलङर्थातीतत्वादिकं चैत्रेपि॥ ननु तथान्वये भाना
भावइत्यत आह। तथैवेति। लिङादिसमभिव्याहारस्थले धात्वर्थविशेष्यकेष्टसाधनत्वप्रकारकबोधस्यैवानुभवसिद्धत्वादित्यर्थः॥ इ
दमत्रावधेयं। यचैत्रेणास्तुपत इत्यादौ वर्तितं तत्तृतीयार्थः। वर्तमानत्वं भावतिङर्थः। धात्वर्थस्यापत्तथा च चैत्रवृत्ति वर्तमानहृस्यापज्ञस्या[?]न्वयबो
धः। एवं चैत्रेणास्तुपत इत्यादौ भावलिङ इष्टसाधनत्वादिकमर्थः। तथा चैत्रवृत्तिस्वाय इष्टसाधनं कृतिसाध्या शय्या कारकान्वयबो
धः॥ एवमन्यत्रापि सूक्ष्ममतिभिरुन्नेतव्यमिति। नत्वबोधकानामिति। वर्तमानत्वाद्यबोधकानामित्यर्थः। ननु भवनायाः प्रथमान्तय
दोपस्थाप्यकेनत्वबंधेनान्वयः। तनावदा अयतासंबंधेन चैत्रेणापच्यते तंदुल इत्यत्र तंदुले आख्यातार्थकृतिरूपाया भावनाया वाच्यत्वा

दित्यत आह भावनायाश्चेति ॥ आश्रयत्वेन आश्रयत्वसंबंधेनेत्यर्थः । अन्यथेति वक्ष्यमाणपरंपरयेत्यर्थः । तथा चाख्यातात्साक्षात्परं
१५ परंपरया वा भावनाविशेष्य एव संख्यायामन्वयनियाम इति भावः । न च संख्याव्यतिरिक्ताख्यातार्थमात्रस्य भावनापदशक्यतया अतोख्यात
15 स्थले कर्मत्वस्याख्यातार्थत्वात्साक्षाद्भावनाविशेष्य एव संख्यान्वयनियमोस्तु । अलं परंपरयावेत्यस्य निवेशेनेति वाच्यं प्राचीनमते कर्माख्या
तस्थापि कृत्यर्थकतया कर्तृनैरर्थक्यलाभाभावेन कर्मत्वस्य भावनात्वविरहदुपदर्शितानुपपत्तेरभावादिति । ननु यथा चैत्रेण पच्यते तंदुल इत्यत्रान्वे
याविकमते परयाकर्मणि कृतेरन्वयः । तथा चैत्रेण पचति तंदुल इत्यत्रापि कंयनान्वयबोधः । एवं नैयायिकमते चैत्र पचति तंदुल मित्यत्रापि आ
श्रयतासंबंधेन कृतेरन्वयबोधापत्तिः । एवं मैत्र पच्यते तंदुल इत्यत्र वाक्यं तन्मते कर्तृकर्मणोर्यथोक्त । रीत्या कृतेर्नान्वयः । दर्शितस्थले सुस
वेत्राख्यातपदात्कृतेरुपस्थितित्वात् इत्याशंकामपाकर्तुमाह तावेति वैयाकरणस्येत्यर्थः । तथान्वयबोधकत्वमिति कर्तृकर्मणोः कृतौ
घकत्व इत्यर्थः । तथा वैयाकरणमतेपि तादृशशाब्दबुद्धित्वावच्छिन्नं प्रतितादृशतादृशानुपूर्वीज्ञानत्वेन हेतुत्वकल्पनान्नानुपपत्तिरिति
भावः । तथाविधकार्यकारणभावकल्पनाबीजं स्फुटमेव स्पष्टयति । अतइति । तथाविधकार्यकारणभावकल्पनादित्यर्थः । नप्रयोगादति
नतादृशशाब्दबोधजनका इत्यर्थः । ननु भावनायाकृतिरूपत्वेन तद्विशेष्ये संख्यान्वयनियमांगीकारे रथो गच्छतीत्यादौ कथं रथे संख्यान्वयः ।
भावनाविशेष्यत्वाभावादित्यत आह ॥ आख्यभावनाचेति । संख्याव्यतिरिक्ताख्यातार्थमात्रमेव इत्थं नियमघटकीभूतभावनापदार्थ इत्यर्थः । राम
अचेतनानुरोधादिति । रथो गच्छतीत्यादौ रथादौ संख्यान्वयानुरोधादित्यर्थः । तथा चाख्यातस्य कर्त्रादिगतसंख्याभिधायकत्वाभिधानाभिधाना १५

मेव प्रथमान्तार्थमुख्यविशेष्यतादिनियमोपपत्तौ आख्यातस्य कर्त्रादिशक्तिमभ्युपगम्य लाघवं वैयाकरणानां मतमनादरणीयमेव लब्धकर्तृशक्तिवादिमते नैयायिक
मे अत्र घटानयने मुख्यविशेष्यत्वानापत्तेः॥ ननु नैयायिकमते आख्यातपदचैत्रपदयोर्विभिन्नरूपेण एकधर्मिबोधकत्वरूपसामानाधिकरण्यानुभवो नुपप
न्नः। न च धात्वनुभवकृतविश्रामाभावात् कथं तत्र तमनुभवं नेभिसात आह विभिन्नान्वयितादानव्याचनाद्दशानुभव एवासिद्ध इति भावः॥ अन्यादृशं विवि
भिन्नव्यमर्बोधकत्वरूपं सामानाधिकरण्यमित्यपर्यः॥ अत्र वैयाकरणमतानुयायितः॥ आख्यातस्य कर्त्रादिशक्तिकल्पने नैयायिकमतमपेक्ष्य लाघव
सम्भवात् तथैवोचितं तथा हि। मते कर्त्रादिप्रकारकज्ञानाभावे सति कर्तृप्रत्यक्षत्वावच्छिन्नं प्रति आख्यातपदात् तिरूपितशक्तिज्ञानादिघटितशाब्द
बोधसामग्र्याः प्रतिबंधकत्वाकल्पनेपि तथाविधशाब्दबोधसामग्रीकाले कर्तृत्वप्रकारकज्ञानाभावाभावेनाविषयासत्तयैव तयाविधलौकिकप्रत्य
क्षानुत्पादसम्भवे तथाविधप्रतिबध्यप्रतिबंधकभावकल्पनाभावप्रयुक्तलाघवमतिस्फुटमेव। नैयायिकमते तु तथाविधशाब्दबोधसामग्रीकाले
तादृशज्ञानाभावरूपविषयसत्वेन विना तथाविधप्रतिबध्यप्रतिबंधकभावकल्पनं विनया विधाप्रत्यक्षवारणासम्भवात् तत्कल्पने मह
द्गौरवमिति। न वैयाकरणमते कृतिप्रकारकज्ञानाभावप्रत्यक्षं प्रति तथाविधशाब्दबोधसामग्र्याः प्रतिबंधकत्वकल्पनोवश्यकर्त्तव्य इति नैयायिकम
तमपेक्ष्य लाघवावकाशः॥ नैयायिकमते तथा कल्पनाया अभावादिति वाच्यं वैयाकरणमते कर्तृत्वरूपस्थितिकाले कृतिप्रकारकज्ञानसत्त्वस्यान
वश्यकतया नयाविधशाब्दबोधसामग्रीकाले विषयासत्तयैव कृतिप्रकारकज्ञानाभावप्रत्यक्षवारणसम्भवेन तथाविधप्रतिबध्यप्रतिबंधकभा
वाकल्पनतया उपदर्शितलाघवस्याक्षतत्वात्। यदि च न वा नोक्तं खलारीत्या कृप्तेनातिर्वाहेन तत्र तथापि घटपटानिबध्यप्रतिबंधकाभावत्त्वेन

धिवमितिमन्यते न तथापि नाहंश प्रतिबंधकाभावे प्रत्यक्षहेतुत्वसंबंधकल्पनागौरवं नैयायिकानामिताऽ४ वनदपि न विचारसहं ॥ गुरुत्वाश्रीर
१६ 16 शरीरपाकानुकूलाश्रयप्रकारकयोः । एतेनात तथाविधकमाश्रयभेदज्ञानाभावत्वालौकिकवाधाभावत्वादिरूपगुरुधर्मावच्छिन्नादिघटितशाब्दत्वे य
सामग्र्यभावे अनन्तघटपटादिप्रत्यक्षकारणत्वसंबंधकल्पनेन वैयाकरणानामनर्थवागौरवं समवादितास्ताविनस्तर४ कुत्यमिति । कोनसं
बंधेन भावनाया विशेष्य इत्यर्थः४ । (सत्याती) शेकने । विषयतयेति । अश्वयष्टास्यक थंपदार्थैकदेशे भावनाया विशेष्ये तथा चैत्रेण पच्यते तं
डुल इत्यादौ तंदुलो विषयतासंबंधेन भावनाया विशेष्य इत्यर्थः४ । सविषयव्यापार इति । असविषयव्यापारानाभिप्यानरस्थल इत्यर्थ
४ । एयेन गाम्पते मामइत्यादौ नोदनाख्यसंयोगरूपव्यापारख्यातार्थतयानस्पचतिविषयतया विषयतासंबंधेन ग्रामादावन्वयासं० भवेनो
पदर्शितरीग्रेरस्तता संभवदुक्तिकतत्ति भाव४ । मैत्रान् निष्पाकभावनेन निष्पाकभावनेन मैत्रा ति मैष्टायायाकानुकूलभावनातादि
षयस्ते डुलइत्यर्थः४ । नइलेन तथाविधभावाना विलाभ्ये विषयत्वेनुभवसिद्धत्वेलाल्येग्राह्यमितिपवद्येमम् । कर्माख्यातस्थले कर्मत्वप्र
कारककर्मविशेष्यकवोध्यास्पानुभवसिद्धत्वेलाहा । मैत्रानष्टतिप्रतीयत इतीति । ताहशवाक्यजन्यबो[illegible]ति शेषा४ । साक्षा
त्परंपरया वेति । अत्रबोधदानमिति येम् । एयेन गाम्पते ग्रामइत्यादौ ग्राम भावनाया अन्वयप्रकारमाहारयेन ग[illegible]परस्पादिना । तथा च राम
कर्माख्यातस्थले भावनाया धात्वर्थे अन्वय४ । क्वचिद्विषयतया कुत्रापि ज्ञान्यतया कर्मणि परयानिभाव४ । ४२ प्राचीनमतदू
षयितुं नवीनमतं दर्शयति । नव्यास्त्विति ॥ ननु कर्माख्यातस्थले आश्रयत्वस्य तृतीयार्थत्वे कर्त्राख्यातस्थले यत्र भावनाविशे १६

घटत्वेनान्वेयति कर्माख्यातस्थले स एव भावनायां विशेष्यत्वेनान्वेतीत्यनभवलोपायतिः॰। एवं तादृशवाक्येन न तथाविधबोध्याज्ञनने
श्रोध्येयत्वेन तृतीयाया यत् निरूपितशक्तिज्ञानस्य सहकारित्वकल्पने गौरवं घटेत्वाहु स ख्यामात्रेण्वेति। मात्रपदेनाधेयत्वव्यवच्छेदः॰॥ संबंध
ः। चैत्रभावनयोः संबंध इत्यर्थः॰ वाक्यार्थ इति। तथाविधावाक्या। क्यानुपूर्वीज्ञानबलाद्धोद्धबोध्ये भासत इत्यर्थः॰। नया च तयाति घ्रा
त्वेदनुभवः तदा संख्यामात्रे तत्तीयार्थः॰ आधेयत्वं तु संबंधमर्यादया भासत इति भावः॰। तथेति। वाक्यार्थ इत्यर्थः॰। नदपीति। फलमपीस
ध्येति। वाक्यार्थसंबंध इत्यर्थः॰। भासमानत्वादिति। वनया च नामार्थधात्वर्थयोर्भेदान्वयव्युत्पत्त्यानुपगमेन कर्माख्यातस्थले फलप्रका
रकबोधानुभवापलपनचनत्र फलस्य संबंधविधया भानासंभवादिति भावः॰। क्रियाजन्यफलालाभादिति। अन्यनासंबंधेन क्रियावि
शिष्टं यत्फलं तस्य धातुनाऽलाभादित्यर्थः॰। विशेषणविशेष्यभावेत्यादि। फलविशेष्यकक्रियाविशेषणकबोधस्य धातुतोऽशक्यत्वा
दित्यर्थः॰। एतावता प्राचीनमतं दूषयित्वा नवीनः॰ स्वमतमुपसंहरति। तस्मादिति। इत्यं चेति। फलस्यालने पदार्थत्वे चेत्यर्थः॰। तलमाते
ति। तया च कर्माख्यातस्थले फलविशेष्यकजन्यतासंसर्गिकक्रियाविशेषणबोधोऽनुभवसिद्धः स चानुपपन्न इति भावः॰। भावनाविषय
स्य चेति। भावनाया विषयस्य चेत्यर्थः॰। फलेऽन्वये जन्यतासंबंधेन फलेऽन्वये। अन्वये। अन्यत्र कुत इति। कर्माख्यातस्थले कुत इत्यर्थः॰
तया च तत्राख्यातार्थान्तरे वर्तमानत्वादौ धात्वर्थस्यान्वयापत्तिवारणाय धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन तत्राहुबुद्धि
त्वावच्छिन्नं प्रति आख्यातपदाजन्यकृत्युपस्थितेर्विशेष्यतासंबंधेन तेन तुल्यस्य कल्पयन्नानधात्वर्थविशेषणत्वेन तिङर्थे कृते दन्यय
य इति भावः॰ कृत्यनाभिव्यापकनिकृत्सनभिधायकोयो भावकर्मविहितकृत्प्रत्ययस्तद्योगेन भावनाकृत्यशात्के तृतीयारूपय इत्यर्थः

शव्युत्पन्नत्वादिति। चैत्रेणागतमित्यादिभावाविविक्तिनकृतप्रत्ययस्थले कृत्त्वादिति भावः। तथाविधकृतप्रत्ययस्थले सुवर्थकर्तृनिष्ठ
१७ प्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धिं प्रतिधातुजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वस्य क्लृप्तत्वात् सुवर्थकर्तृप्रकारकत्वविशेष्य
काभाव इति भावः। नन्वाख्यातस्य। कर्तृकर्मत्वाभिधायकत्वे चैत्रेणपच्यतेतंडुलः नडुलेपच्यते चैत्र इत्यादिप्रयोगापत्तिरित्यत आह
17 कर्तृकर्मवदिति। वैयाकरणमते यथाकर्त्राख्यातत्वं कर्तृत्वप्रकारतावच्छेदकं तथा च कर्माख्यातत्वं कर्मत्वप्रकारतावच्छेदकमिति शक्ततावच्छे
दकं तथा नैयायिकमतेपि कर्त्राख्यातत्वं कृतिप्रकारतावच्छेदकं एवं कर्माख्यातत्वं कर्मत्वप्रकारतावच्छेदकमिति। उपदर्शितस्थले कर्तृकर्म
त्वयोर्बोध्याभावात् प्रोपदर्शितप्रयोगानुपपत्तिरिति भावः। हातकर्मत्वयोः शक्ततावच्छेदककर्त्राख्यातत्वकर्माख्यातत्वे उच्येते नाख्यात
त्वमित्याशयेनाह। भिन्नत्वेनेति। तथासति पच्यतेतंडुलो मैत्र इत्यादिप्रयोगापत्तिर्दुर्वारेति भावः। किंतु आख्यातत्वमेव कृतिशक्त
तावच्छेदकं। तथाच। नचैवमु योगापत्तिः। कृतिविशेष्यकाख्यातपदनिरूपितशक्तिज्ञानेन कर्तृशाब्दबोधे जननीये चैत्रस्तंडुलपल
पवृत्तिताख्यानुपूर्वीज्ञानस्य सहकारित्वकल्पनात्। एवं कर्मत्वविशेष्यकाख्यातपदनिरूपितशक्तिज्ञानेन कर्मत्वबोधे जननीये मैत्रे
णपच्यतेतंडुल इत्याद्यानुपूर्वीज्ञानस्य सहकारित्वकल्पनाद्युपदर्शितायतेरभावादिति भावः। एवमप्यत्रापि शंक्यं कोद्यानुपू
र्वीज्ञानसहकारित्वरूपसन्निधानाराद्ध्योरणीभरनीय इति प्रहुः। ननु कर्माख्यातस्य चैत्रकर्तृकपरनामकभावनार्थत्वे तर्हि कुतो
भावनान्वयिनि संख्यान्वयानिसंख्यान्वयानियमः। चैत्रेणपच्यतेतंडुल इत्यादौ भावनान्वयिनि तंडुले संख्यान्वयेन व्यभिचारादि राम ११
त्यत आह। तिङ्गुपस्थापिताद्या इति। तथाच संख्यायाः प्रथमगोपस्थाप्यस्यैवान्वयिनियमो ननु भावनान्वयिनि तस्यान्वयनियम इति भावः

नचाख्यातोपस्थाप्यान्वयित्वेनैव संख्याया अन्वयनियमः किंनामुयेनः। नथामतापि कर्माख्यातस्थलेऽनुपपत्तिभावादिति चेन्न। तथा
नियमाऽस्वीकारेन शयतीत्यादौ वृत्तीमानत्वादिविशिष्टेपि संख्यान्वयप्रसंगादिति। कर्तृकर्मविहिताख्यातशक्तिमुपपाद्य कृत्कर्महि विंतः कृत
प्रत्ययस्य शक्तिमुपपादयति। चैत्रेण गतोत्यादि। अथ सार्थतामिष्यतस्तकेन कर्मणि कृद्घञ्चोऽइत्यनेन नान्यत्र:। कर्त्रादि विहित कृतः कर्त्र्यवाच
कत्वं चैत्रेण गतेत्यादौ समानालिंगकत्वानदृशानुपपत्तेः। सामानालिंगकस्थानाभेदान्वयबोधस्यानुभवसिद्धनयात्तस्यानिर्वाहादिति भावः। न
नुताहृशानुभवे मानाभाव इत्यत आह। भोक्तात्यतीत्यादि। तत्र च कर्तृप्रत्ययस्य कर्त्र्याख्यवाचकत्वे भोजनानुकूलकृतिविकृति स्ततृप्य
तीत्याद्यन्वयबोधस्यापत्तेः। स च विशेषदर्शिनामनुपपन्न इति विशेषादर्शिशतानां तादृशवाक्यात् भोजनानुकूनकृतिस्यपरन्वयबोधाय
पपत्तेः कर्त्रादिविहितकृतः कर्त्रादिवाचकत्वमावश्यकमिति भावः। सा च मानाधिकरण्यादीति। अभेदान्वयबोधादौ तु च्छः। आदिना भोक्तात्व
यतीत्यादौ भोजनानुकूलकृतिमान् यातीत्याद्यन्वयबोधस्य परिग्रहः। न तु कृत्प्रत्ययस्य कर्त्रादिवाचकत्वे गतेत्यादौ धात्वर्थत्वयानुपपा
त्तिः। कर्त्रादेः कृत्यादिरूपतया कृत्यादेः पदार्थैकदेशत्वेन तत्रानुकूलत्वादिसंबन्धेन धात्वर्थगमनादेरन्वयासंभवादित्यत आह। चैत्रस्यानिष्ठ्यं तार्थ
त्येत्यादि। न च तादृशजन्यपुरुषजन्यपुरुषजन्यपुरुषो जन्यपुरुषरूपपुत्रवाचकतया जन्यत्वस्य पदार्थैकदेशत्वापत्तेनैव चैत्रस्येति षष्ठ्या
तार्थस्य चैत्रसंबन्धित्वस्यान्वयः। जन्यपुरुषजन्यपुरुषरूपनप्तृपदार्थे चैत्रसंबन्धित्वस्यान्वये चैत्रपुत्रपि चैत्रस्य नप्तेति प्रयोगप्रसंगात्। तथा
पदार्थैकदेशेऽन्वयः। तथा चैत्रेण गतेत्यादौ पदार्थैकदेशे बोधागीकारेपि क्षतिविरहः इति भावः। ननु जन्यपुरुषजन्यपुरुषस्य नप्तृपदशक्यत्ववा
वच्छेदकत्वविशिष्टशक्तिकल्पने गौरवापत्त्यातदपहाय जन्यजन्यपुरुषत्वं चेति शक्यतावच्छेदकद्वयमेव तस्मात् समभ्युपगम्यम्। तयाच चैत्रस्य नप्ते

त्यादौ चैत्रसंबन्धित्वस्य जन्यत्वेऽन्वयः। पत्नीत्वस्य च पुरुषत्वेऽन्वयः पुरुत्वस्य जन्यत्वेऽन्वयः। तत्र जन्यस्य पुनः पुरुषेऽन्वयः। एवं इत्येवं रामस्यापि
१८ त्र सर्वत्र ज्ञेयम्। तेऽस्मद्गुरुकुल इति स्यालान्तरम्। हि भिन्नान्यइत्यादि। अयं भावः। अन्यपदस्य भेदणार्थत्राप्रतावच्छेदकः। ननु भेदाश्रयत्वगौ
रवात्। वृत्तिरूपदा तथानुभवाबाधात्। एतेनान्यपदस्यापि स्वइत्यर्थकलयनं निरस्तम्। तथा च भेदत्वादन्यइत्यादौ प्रयमप्यर्थे प्रातियोगिकत्वस्यान्वय
18 दार्थैकदेशे भेदान्वयो वि नैकदेशान्वयस्वीकारमनुपपन्नः। एवं व्युत्पत्तिप्रयोगितादौ पृथक्पदार्थकदेशे १थाप्येकपञ्चम्यर्थावधिमत्त्व
स्यान्वये नपित थातथैव घटादयः इत्यादौ न भोविरोधिगुणवति लक्षणायां पदार्थैकदेशगुणे पञ्चम्यर्थान्वयेनापत्ता वाधिकरणपरत्वाव
रोधिगुणवानित्यन्वयबोधापत्तौ तथा च तेभ्यिवकृतप्रत्ययस्य लोपे एकदेशान्वयस्वीकारे बाधकाभावादिति। ननु गोत्वसाधारण्यइत्य
देगोत्वयरुत्वादौ नित्यत्वरुभिन्नत्वादेरन्वयबोधापत्त्या किंचित्पदार्थनिष्ठप्रकारतानिरूपिततविशेष्यतासंबन्धेन शाब्दबुद्धिमाति
मुख्यविशेष्यतासंबन्धेन पदार्थतापदार्थोपस्थितेर्हेतुत्वस्यावश्यकतया चैत्रस्य नत्तादौ न भूपदार्थैकदेशे जन्यत्वैकथैचैत्रसाविधत्वस्या
न्वयइत्यत आह। तर्यैवोत्यैवेति। कार्यतावच्छेदकसंबन्धविशेष्यतायां नञ्पदार्थाप्रतिरिक्तरूपतित्वनिवेशेनैवेत्यर्थः। साका
ङ्क्षत्वादिति। शाब्दबोधपदार्थोपस्थित्योः कार्यकारणभावस्य कानानीयत्वादित्यर्थः। तथा चान्यथानुपपत्त्या गुरुरपि तथैव कार्य
कारणभावः स्वीक्रियत इति भावः। ननु चैत्रनसेत्यादौ जन्यताश्रयपुरुषजन्यत्वरूपसंबन्धएवस्वार्थः। तस्य च नञ्पदार्थादौ जन्यपुरुषरू
षजन्यपुरुषेऽन्वयः। ननु पदार्थैकदेशः। अन्यत्वे चैत्रानिरूपितत्वविशेष्यपर्थज्ञयघस्यान्तरायः। तथासत्युपदर्शितकार्यकारण राम.
भावेन नञ्पदार्थाप्रतिरिक्तत्ववतित्वस्य विशेष्यतायां निवेशे गौरवात्। तया च भोगेत्यादित्यान्तानामनवकाशाइत्यत आह। अस्तु वेति १८

।कृत्यादिघटितस्यैवेतिस्वानुकूलकृतिमत्त्वादिरूपस्याश्रयसंबंधस्यप्रवेशइत्यर्थः।कर्त्रादिनासमन्वयइतिकृत्प्रत्ययार्थकर्त्रादौधात्वर्थग
मनादेर्दिप्रकारकबोधेप्रकारतावच्छेदकासंबंधइत्यर्थः।तथाचयथानस्यपदार्थैकपदार्थितपरंपरासंबंधरूपवृत्त्यर्थस्यैवान्वयः स्वीक्रि
यतेयतेथात्राचैत्रादन्यइत्यादौस्वाश्रयभेदवत्त्वसंबंधेनभेदविशिष्टेचैत्रप्रतियोगिकस्यान्वयः नत्वेकदेशान्वयोपितथागतेत्यादौअपिकर्त्रा
दिरूपकृत्प्रत्ययार्थएवस्वानुकूलकृतिमत्त्वादिरूपपरंपरासंबंधेनगमनादेरन्वयोनतुपदार्थैकदेशेपीतिभावः।ननुचैत्रेणगतोग्राम
इत्यादौक्तप्रत्ययेनकर्मादिगतसंख्यानभिधानात्द्वितीयाद्यापत्तिरित्यतआह।मुख्येत्यादि।फलादीत्यादिपदेनविषयत्वादिपरिग्रहः।
कृत्यादीत्यादिपदेनचरथोगक्तीत्यादौआश्रयत्वादिपरिग्रहः।द्वितीयादयइत्यादिनातृतीयापरिग्रहः।अत्रचेति।चैत्रेणगतोग्रामइत्या
मइत्यादौचेत्यर्थः।विशिष्टाद्यस्यकेचानेइत्यर्थः।विशेषणाद्यभिधानादिति।कर्मत्वादेरपिबोधनादित्यर्थः।तथाचक्तप्रत्ययेनयत्रवि
शेषणविधयाविशेष्यविधयाकर्मत्वादिकंनबोध्यतेतत्रद्वितीयादयइत्येकोनियमः।एवमाख्यातेनयत्रकर्मत्वादिकंनबोध्यतेतत्रापि
द्वितीयादयइत्यपरोनियमः स्वीक्रियतेनतुकर्मादिगतसंख्यानभिधानघटितोपिनियमइतिनोक्तानुपपत्तिरितिभावः।कस्यचिन्मतंदूषयितुं
न्मतमुपन्यस्यति।।यत्त्वित्यादि।धात्वन्तरप्रत्ययत्वेनकर्तरिशक्तिरितिधात्वन्तरप्रत्ययत्वमेकनिष्ठशक्ततावच्छेदकमित्यर्थः तथाचशक्ततावच्छे
दकलाघवात्सर्वत्रकृत्त्वेनैवशक्तिः।नवाख्यातस्यकृतौशक्तिः।कृतौशतृप्रत्ययस्यकर्तरिशक्तिरितितथासतिविभिन्नशक्ततावच्
छेदकत्वेनगौरवादितिभावः।ननुकृत्प्रत्ययस्यकृतिशक्तत्वेदेवदत्तःपाचकइत्यादौदेवदत्तादिपदार्थपाकाद्यर्थस्यकथमभेदान्वय

स्यकृतिशक्तत्वे देवदत्तः पाचक इत्यादौ देवदत्तादिपदार्थयाचकाद्यर्थस्य कथमभेदान्वयबोधः। तत्र अभेदान्वयबोधस्यैवानुभवसिद्ध
१८ तया प्रकारांशस्यानरस्यवक्तुमशक्यत्वादित्यात आह याचकादिपदे त्विति॥ सामाधिकरण्यानुरोधात्। अभेदान्वयानुरोधात् लक्ष
णानेति॥ तथा च नञ्ञ तथान्वयात् भवस्य कृतः कर्तरि लक्षणायैवातिवीत आलंतत्र शक्तत्वनयेति भावः। भावकृतो यीति। शक्तता
19 यच्छेदकावच्छिन्नत्यप्रशस्य बोधत्वानियमादिति भावः। ननूत्तरप्रत्ययत्वस्य तच्छक्ततावच्छेदकत्वेपि भावकृतो न कृतिबोधकत्वात् तथावि
धबोधे भावकृदादिव्यावृत्त्यानुपूर्वविशेषस्यैव नियामकत्वात् सुपगमादित्यत आह। धातुत्वादिघटितेत्यादि। आदिपदात् प्रत्ययत्वादिप
रिग्रहः। न सात्कधातूत्तरप्रत्ययात् भुवाद्यन्यतमत्वविभाषाधातुत्वस्य प्रकारान्तरेणानिवक्तुमशक्यत्व एव भाख्यातान्यतमत्वं विना
प्रत्ययस्यापीति तदपेक्षया राष्ट्र संबंधे नाख्यातयद्वत्वरूपाख्यातत्वस्यैव लथो कृतिशक्ततावच्छेदकत्वैचित्यामिति भावः। णानेना
ख्यातमात्रस्य कृतिवाचकत्वे कृतिशक्ततावच्छेदक आख्यातत्वमेव कृतः कर्त्रुमात्रवाचैवत्वे कृत्प्रत्ययत्वकर्तृशक्ततावच्छेदकमिति
गौरवमेतदपेक्षया एकस्यैकधातूत्तरत्वं प्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वमुचितमन्यापि निरस्ता प्रत्ययत्वस्य स्यात्त्वे कत्वाघटित
त्वेन लाघवासंभवकाशादिति। कृतौ शक्तिरिति। कृताविशिष्टकर्त्तृकृतः शक्तिकसत्कल्पने अनन्नच्छेदकतावच्छेदकत्वकल्पने गौ
रवं। कुतौ तत्रैव लपनं तु कृतित्वजातेरेव तद्वक्यतावच्छेदकत्वकल्पनेन लाघवमिति। अत्रैव तत्कल्पनमुचितमिति भावः। यत्तद् राम
त्यादिशब्दत्वासंभवस्यागवादियदादिगोत्वविशिष्टशक्यामितनेनान्वयः। न तु गवादियस्यागोत्वपि शक्तिकल्पनस्यावश्यक १८

तयालाघववान चैत्रैव शक्तिकल्पनमस्त्विति पत आह। गोत्वत्वादिनेत्यादि। गोत्वत्व स्यायावेतरासमवेतत्वे सति गोनिष्ठात्यंताभावप्रतियोगि
तानवच्छेदकत्वरूपतया गौरवादित्यर्थः। विशिष्टानंतराणामिति। शब्द विशिष्टमहत्वविशिष्टादीनामित्यर्थः। शक्यत्वमिति। आकाशपद
महत्वादादि शक्यत्वमित्यर्थः। तत्रापि शब्दत्वविशिष्टे शक्तिकल्पने अनंतशब्दादौ शक्यतावच्छेदकत्वस्वीकारे गौरवं। शब्दादौ तच्छक्यत्वकल्पने
नेतु शब्दत्वादिजातेः शक्यतावच्छेदकत्वस्वीकारे लाघवमिति तत्रापि शब्दादेव शक्तिकल्पनं स्यादिति भावः। तुल्यपरत्वेति। कृतप्रत्ययस्य स्थले
पि अविशिष्ट इत्यर्थः। तथा च यथा शब्दादौ आकाशादिपदस्य स्वारसिक प्रयोगाभावात् तत्र न तस्य शक्यत्वं। तथा कृतावपि कर्तृत्वादि हितकृतप्रत्ययस्य स्वा
१० सिकप्रयोगाभावात् तत्रापि न तस्य शक्यत्वमिति भावः। कस्यचिन्मतं दूषयितुं तद्दर्शयति। एवमित्यारभ्य आकचिदित्यंतं॥ ना॥ एवं कर्मविहितकृतुक
र्मविहितास्यात् तयोः कलबोधकत्वव्यवस्थायनेवेत्यर्थः। लाघवादिति। फलानुकूलत्वविशिष्टशक्तिकल्पनापेक्षया शरीरलाघवसंभवादित्यर्थः॥
अन्यत्वमइति॥ एतेनान्यत्वमेत्यादि शब्दार्थ इति नियमस्यापि न भंग इति सूचितं। व्यापारविशेषमात्रे इति। गमनत्वादिविशिष्टमात्रमित्यर्थः। मात्र
पदेन फलव्यवच्छेदः॥ इति स्थिता विति। इति स्थितावित्यर्थः। ननु व्यापारमात्रस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ फलव्यवच्छेदलक्षणकर्मस्यकृतो
लाभस्तत आह। ग्रामं गच्छतीत्यादि। आख्यातकृत्प्रदेदनोदाहरणं दृष्टं तत्त्वादेरिति। अत्रादिना ग्रामस्य राते त्यादौ षष्ठ्याः परिग्रहः। फलजनक
त्वलक्षणमिति। फलत्वमात्रजन्यत्वं द्रष्टव्यं। फलत्वविशिष्टजनकत्वस्य द्वितीयाद्यर्थत्वे ग्रामं गच्छतीत्यादौ परसमवेतधात्वर्थजन्यफलशा
लित्वलक्षणकर्मत्वस्य बोधप्रकारमाह। फले चोत्पादि चैत्रसमवेतेत्यादिस्वदेकदेशान्वयस्वीकारेण तथात्वयबोधस्वीकारे तु नयावितिवे
घतया उपदर्शितकर्मत्वस्यापि बोध इति भावः। फलजनकत्वे द्वितीयादेः शक्तिकल्पने गौरवात् दपहायाफलेन शक्तिलनकत्वे तु संसर्गमर्या

दयाप्रासत्तद्दशसैवसम्यक्त्वात्तर्थवाहाफलमात्रेषेति। उत्पत्वविशिष्टेवेत्यर्थः। फलसामान्यलाभेपीति। उत्पत्वविशिष्टस्य भालाभेपीत्यर्थः। निय
२० नेति। लक्षणायाः स्थितिशक्तिमत्त्वकालीनेत्यर्थः। संयोगविभागाद्यलाभादि संयोगत्वविभागत्वादिना संयोगविभागादिरूपफलस्या
लाभादित्यर्थः। गम्यादिति। पूर्वं हेतोऽयदर्शितदोषसंभवादित्यर्थः। फलविशेषावच्छिन्नेति संयोगत्वादिविशिष्टतनकेत्यर्थः। ननु लक्षणा
यस्थित्वाद्यभावकालेनेथार्विधबोधाभावेरूपति विरहरत्पतोदोषांतरमाह अन्यथेति। व्यापारमात्रस्य धातुवाच्यत्वे इत्यर्थः। पर्यायतायत्ते
रिति। एकशक्त्यतावच्छेदकाश्वाद्यिभेनायरसे बयर्यायपदार्थत्वादितिभावः। शक्ततातत्वादपीत्यादि॥ संयोगत्वादिविशिष्टावच्छिन्नव्याया
रस्यधातुशक्यत्वादिनोदीत्यर्थः संयोगएलि लमितादि जन्यत्वरूपफलत्वावच्छिन्नस्यैव कर्मत्वात्तादिवाध्यते न फलांतरस्यापि
बोधसंभवादितिभावः। नरवाच्छिन्नेति। संयोगत्वादिविशिष्टावच्छिन्नेत्यर्थः पातथाचतादृशसमभिव्याहारविशेषस्यैव तथाकार्यताव
च्छेदकात्वादितिभावः समभिव्याहारविशेषात्सामान्यधर्मावच्छिन्नवोधकपदस्य विशेषबोधकत्वे दृष्टांतमाह। यथेत्यादि। अन्यदेवेतादिति
। तथाचतत्रदीर्घत्वरूपेण स्वर्गबोधकत्वं तदासामान्यधर्मावच्छिन्नरूपेण संयोगादिबोधकत्वं। यद्वितत्त्रेष्टस्वर्गपारभेदान्वये न स्वर्गा
दिरूपफलबोधकत्वं तदाप्रकृतेपि संयोगादिपदयोनभेदान्वये न संयोगाभ्यांते आम इत्यादौ संयोगत्वा बोधकत्वमितिभावः। ननु सा
मान्यधर्मावच्छिन्नबोधकपदात् सामान्यरूपेण विशेषबोधे संभवेपि गम्यते ग्राम इत्यादौ संयोगत्वादिना संयोगस्य ग्राम पतितिवबो
धोलाभयसंभवा॥ न च संयोगफलयोरभेदान्वयेन संयोगत्वरूपेण तथा बोधस्य संभवरति वाच्यं रन राविशेषणत्वेनोयास्थितस्या राम
न्यत्वालिशेषणत्वेनान्वये निराकांक्षत्वेन तथान्वयासंभवादित्यत आह। अस्तु वेति। तथाच ययावाच्छिविशेषविषयत्वरूपसामान्य २०

धर्मावच्छिन्नशक्त्याख्यातात् संयोगत्वादिरूपविशेषरूपेणाबोधः। अयं धर्मावच्छिन्नोऽपि पदनिरूपितशक्तिग्रहतात्पर्येण यद्रूपेणायं बोधजनक
त्वमिति नियमस्य एतदतिरिक्तस्थलत्वादिति भावः। इदं च तदादिसर्वनामपदस्य शाब्दबुद्धिविशेषविषयतावच्छेदकबुद्धिविशेषविषयत्वमेव शक्तिग्रहो
पितया धर्मावच्छिन्ने एव बोधस्तदादिपदशक्त्या इति ज्ञानादुत्पद्यत इति प्राचां नामतानुसारेणावोध्यं। ननु घटादिपदं इति रूपितशक्ति
ज्ञानात् जातित्वेन घटत्वादिप्रकारकादनिरूपितशक्तिग्रहात्। स्वरूपतो घटत्वादिप्रकारको बोध्यायति ४ वारणाय निरवच्छिन्नप्रकार
तासंबंधेन शाब्दबुद्धिं प्रति निरवच्छिन्नप्रकारताप्रबंधेन यदनिरूपितशक्तिज्ञानस्य हेतुत्वकल्पनाभावश्यकत्वेन तथा कथं फलत्वविशि
ष्टे आख्यातादिपदनिरूपितशक्तिज्ञानात् संयोगत्वादिना शाब्दबोधः। तदा संयोगत्वे उपदर्शितसंबंधेनोपदर्शितकारणविरहात्
। न च विषयभेदेन त्वादृशकार्यकारणभावकल्पनेन प्रकृतस्थले समकल्पत इति वाच्यं। विषयभेदेन कार्यकारणभावकल्पने गौरवात्। न च
दादिपदात् विशिष्यशाब्दबोध्यान्यथानुपपत्या तथाकलनमावश्यकमिति वाच्यं। अनंतकार्यकारणभावकल्पनापेक्षया नदादिपदा
दिपदानां विशिष्यशक्तिकल्पनस्यैवोचितत्वात्। इति प्रकृते यद्विशिष्य शक्तिरावश्यकी तदभिप्रायेणाप्रकारांतरेण कर्मत्वनिर्वचनमुखेन
व्यापारमात्रस्य धात्वर्थत्वे दूषणमाह। अपि चेति। धात्वर्थतावच्छेदकफलेत्यादि। धात्वर्थतावच्छेदकविशिष्टफलेत्यर्थः। गमिपत्योः कर्मत्व
स्यादिति। अत्र धात्वर्थगमनादिक्रियाजन्यविभागरूपस्य फलस्य पूर्वदेशसत्त्वात् गमिपत्योः पूर्वदेशस्यापि कर्मतापत्तिरित्येवं त्यजिक्रिया
जन्यसंयोगरूपफलस्य उत्तरदेशसत्त्वात् उत्तरदेशस्यापि त्यजेः कर्मत्वापत्तिः। तथा च जन्यविभागादिफलस्य पूर्वोत्तरयोः सत्त्वात् तस्य
देरुभयत्र कर्मत्वापत्तिरतो धात्वर्थजन्यफलशालित्वं कर्मत्वं किंतु धात्वर्थतावच्छेदकफल॰शालित्वात्। तत्र चेनोपदर्शितानुपपत्तिः

।उत्तरसंयोगरूपस्यैव फलस्यैव गमयत्वात् तथा तदवच्छेदकतया तस्य च पूर्वदेशेऽभावात्। एवमग्रः संयोगस्य यतेरवच्छेदकत्वात् तस्य च पूर्वदेशेऽभा
२१ वात्। नागमिपत्योः पूर्वदेशकर्मत्वापत्तिः देशेऽभावात्। एवमग्रः संयोगस्य यतेरवच्छेदकत्वात्तस्य च पूर्वदेशेऽभावात्। न गमिपत्योः पूर्व
देशकर्मत्वापत्तिः। एवं विभागस्य त्यजिक्रियावच्छेदकतया तस्योत्तरदेशेऽभावात् उत्तरदेशोऽत्यजेः कर्मत्वापत्तिः। स्पन्दस्यावच्छेदकफलाभावे
नतो भयत्र कर्मत्वापत्तिरिति व्याप्यारम्भात्र स्पन्दशालयतेर्ग्रामं गच्छतीत्यादौ कर्मत्वबोधानुपपत्तिरेव दोष इति भावार्थोऽवसेयः। ननु वात्वा
त्वर्थजन्यतत्फलशालित्वमेव कर्मत्वमित्यनुगतकर्मत्वमस्तु। अनुगतकर्मत्वनिर्वचने प्रयोजनाभावादतोऽनुगतकर्मत्वनिर्वचनप्रयोजनमाह
॥फलावच्छिन्नेति। फलेऽपनकेत्यर्थः। सकर्मकत्वव्यवहारइति। तथा चानुगतकर्मत्वानिर्वचनेऽनुगतसकर्मकव्यवहारविलोपप्रसङ्ग इति भावः। न
न्वेसति कथं वा नातीत्यादौ सकर्मकत्वव्यवहार इत्यत आह। भोक्तारित्यादिना। त्वामाक्षाप्य। कृइत्यर्थः। भथा चोपदर्शितसकर्मकत्वमनुख सकर्मक
त्वव्यवहारनियामकं विषयत्वादिकं तु भाक्तं सकर्मकत्वव्यवहारनियामकमस्मोन त्वन्यदिति भावः। ननु अननुगतमेव कर्मत्वमस्तु अनुग
तर्थो व्यवहाराभावेऽप्यहायतिरत आह। तादृशधात्वनुयोगत्वावच्छेदेति। उपदर्शितसकर्मकधातुयोगइत्यर्थः। तथा चानुगतकर्मत्वानिर्वच
ने सकर्मकधातुयोगइत्यर्थः। तथा चनुगतकर्मत्वानिर्वचने सकर्मकधात्वनुयोगे कर्मप्रत्ययविधानस्माननुगतत्वापत्तिरिति भा
वः। अत्रेदं बोध्यं यद्यपि ध्यात्वस्य तदर्थतावच्छेदकस्यैव क्याभावेन ध्यात्वयतावच्छेदकफलशालित्वरूपकर्मत्वमपि नानुग। एवं
तादृशाकर्मकत्वविरहोपि ज्ञानातीत्यादौ यथा तत्तद्धात्वनुयोगे जन्यतत्तदेकशालित्वकर्मविव्यानतथा विशिष्य गम्यादिविधानेपि क राम
र्मप्रत्ययविधानं संभवत्येवं। तथा च तत्तद्धातुजन्यतत्तत्फलशालित्वरूपाननुगतविकर्मत्वनिर्वचनेपि दोषः। कर्मप्रत्ययविधानेऽनुगतशा २१

तरस्य प्रकोतरेणापि क्रमभवादिति व्यापारमात्रस्य धात्वर्थत्वेपि न दोषः तथापि तत्पक्षः स्वत्थततः। क्रियाजन्यफलशालित्वरूपाननुगतकर्मत्व
मुक्तव्यापारमात्रस्यैव धात्वर्थत्वे त्यजिगम्योः पर्यायतापातिदोषोदरुद्धर एति। ननु फलावच्छिन्नव्यापारस्य धात्वर्थत्वे नाभार्थयोः भेदान्वयबो
ध्यानभ्युपगमादन आह तत्रचेति। नग्रामं गच्छतीत्यादौ चेत्यर्थः॥ नद्येति। द्वितीयार्थवृत्तित्वं चेत्यर्थः। आकांक्षादिवैचित्र्यादिति। पदार्थः पदार्थेनान्वेति
ननु पदार्थैकदेशेन्वेति नियमतः संकोचकल्पनादित्यर्थः। ते भावतचैव ग्रामादिरूपनामार्थस्यान्वयो न तु धात्वर्थैकदेशे फले इति भावः। ननु ग्रामं ग
च्छतीत्यादौ धात्वर्थैकमर्थधारकस्याधिकरणत्वेनान्वये कर्मणि द्वितीयान्वेति पृथक्सूत्रप्रणयनमनर्थकमेव॥ सप्तम्याधिकरणे चेत्यच्चाद्वितीयासप्त
म्यावधिकरणे चेति करणेनैवाहादित्यत आह। अत एवेति। धात्वर्थतावच्छेदकफलं द्वितीयार्थवृत्तित्वस्यान्वयादेवेत्यर्थः। नद्याश्च सत्यसप्तम्यर्थवृत्तित्वस्य धा
तु शक्तिमुख्यविशेष्योऽन्यथाः द्वितीयार्थवृत्तित्वस्य धात्वर्थैकदेशे फलेऽन्वय इति सूचनार्थः। पदार्थेनान्वेतीति तु यदार्थैकदेशे एतादृशव्युत्पत्तेः सं
कोपि फलमेव द्वितीयार्थः। तज्जनकतासंबंधेन धात्वर्थेऽन्वेच कल्पने गौरवमित्यत आह स्तुवेति। फलमर्थ इति। तथा च फलावच्छिन्नव्यापारस्या
धात्वर्थत्वेपि फलमेव द्वितीयार्थः। तज्जनकतासंबंधेन धात्वर्थेऽन्वेति। आख्येयत्वं तु द्वितीयार्थकर्मकारकयोः संबंधमर्यादया भासते। तथा च ग्रा
मं गच्छतीत्यादौ ग्रामाविशिष्टत्वसंयोगाविशिष्टसंयोगानुकूलाकृतित्ववान्पयः सोम्यरति भावः। ननु धात्विव्यावाख्याजन्यबोधे संसर्गोस्य वारद्वये भा
नमनुभवविरुद्धमित्यत आह स्तावेति। न चैवं त्यजिगम्योः पर्यायतापत्तिरिति वाच्यं। यत्र यद्दशाक्यतावच्छेदकतया व्यापकशक्यतावच्छेदकता
ला यात्रतिष्ठति तत्र य दानामेव पर्यायत्वादिति भावः। ननु फलं तु व्यापारयोः धात्वर्थत्वे तत्रात्र फलार्थकफलजनकव्यापारबोध्यानिर्वाह इत्य
त आह विशिष्टात्विति। जनकतासंबंधेन धात्वफलविशिष्टव्यापारात्वित्यर्थः। अन्वयबललभ्य इति। फलव्यापारयोः परास्परमन्यथालभ्य

इत्यर्थः। तथा सुत्पत्तिवैचित्र्यात् एकपदार्थयोरपि परस्परमन्वयबोधस्वीकारेणातात्‌थाविधाविशिष्टबोधनिर्वाह इति भावः। ननु धात्वर्थताव
२२ च्छेदकफलशालित्वरूपस्य कर्मत्वरूपत्वे भूमिं प्रयातीति विहग इत्यादिवत् आत्मानं प्रयातीति विहग इत्यादिप्रयोगापत्ति विहग इत्यादिप्रयोगापत्ति
ः। तत्र संयोगादिरूपफलस्य लस्याद्विष्टतया स्वात्मनोऽपि तादृशफलाश्रयत्वसंभवे स्वात्मवृत्तितादृशफलानुकूलव्यापारानुकूलकृतिमान् (विभ) नु
२२ विहग इत्यादिशाब्दबोधसंभवादित्यत आह। भूमिं प्रयातीत्यादिक्रियान्वयीति। एतेन परसमवेतत्वस्याद्वितीयार्थत्वे पितस्य फलेऽन्वये संयोगादि
रूपतत्फलस्याद्विष्टत्वात् स्वात्मवृत्तित्वेन तथाविधप्रयोगावारणासंभव इति निरस्तम्। ननु परसमवेतत्वमित्यत्र किमपेक्षया परत्वं विवक्षितम्। प्रकृतधात्वर्थापे
क्षयेति चेन्न। चैत्रेण ग्रामो गम्यत इति प्रयोगापत्तेः। तत्र प्रकृतधात्वर्थापेक्षयाप्यात्मनः परत्वादित्यत आह। इयांस्त्विति प्रवित्रोऽस्य मे वपुः सा
क्ष्यति। यत्कायं परत्वमित्यादिना तिङादीत्यन्नादिना कर्मकृत्परिग्रहः। स्वार्थेति। स्वार्थो यत्फलं तदाश्रयापेक्षेत्यर्थः। इदं च फलावच्छिन्नव्यापारादेः धा
त्वर्थत्वपक्षे। फलव्यापारयोर्धात्वर्थत्वपक्षे तु आख्यातादेराश्रयान्यत्वापर्यवसितयाख्यातार्थाश्रयत्वांशे क्षेयोत्पत्त्यर्थोऽवसेयः। तथा च ग्रामं गच्छतीत्यादौ
ग्रामान्यवर्तिर्यो ग्रामवृत्तिसंयोगानुकूलस्पन्दः तदनुकूलकृतिरित्येवाच्यय -बोधः। एवं ग्रामेण गम्यत इत्यादौ ग्रामान्यवृत्तिर्यो ग्रामवृत्तिसंयोगा
नुकूलस्पन्दस्तज्जन्यफलवान् तदाश्रयतावान् ग्राम इत्यन्वयबोध्य इति भावः। ननु सर्वत्र द्वितीयासमभिव्याहारस्थले फलादेः धात्वर्थत्वेऽपि
तज्ज्ञानार्तीत्यादिप्रयोगानुपपत्तिः। ज्ञानजन्यफलस्य घटादावुत्पत्तित्वे न तत्र तदन्तर्भावेनान्वयासंभवात्। एवं सर्वत्र परसमवेतत्वं कर्मत्वं सप्तार्थे
दमप्यूह्यम्। आत्मा आत्मानं जानातीत्यादौ प्रयोगानुपपत्तेः। आत्मान्यवृत्तित्वस्य ज्ञानादावप्रसिद्ध्यात्तत्रान्वयबोधासंभवादित्यत आह। घ एम
तज्ज्ञानार्तीत्यादि। विषयत्वमिति तु कर्मतिङादिस्थले द्वितीयार्थाभिप्रायेणाविषया। त्वमिति तु कर्माख्यातस्थले आख्यातार्थाभिप्राये एणे २२

कृत्तृतीयेत्यस्य कर्माख्यातादिस्थले इत्यादिः । तथा चासविषयकार्थबोधकधातुकत्वसमभिव्याहृतद्वितीयासमभिव्याहृतत्व धातुस्थले कर्ता
देः धात्वर्थत्वनियमः । एवं तादृशधातुस्थले कर्मप्रत्ययस्य समवेतत्वमर्थो नान्यत्रेति भावः । तथा सति तत्रान्वयबोध्यप्रकारमाह । अ
अन्वयबोध्योत्विति । एकत्रेति । कर्त्रर्थाख्यातस्थले इत्यर्थः । अन्यत्रेति । कर्माख्यातस्थले इत्यर्थः । ननु विषयत्वादेः कर्मप्रत्ययार्थत्वे ज्ञा
तो घट इत्यत्र विषयत्वस्य घटादौ भेदान्वयबोधासंभवः । नामार्थयोर्भेदेनान्वयबोधानंगीकारात् । न वा अभेदान्वयबोधः बाधादत आह
। ज्ञात इत्यादि । तथा आख्यातस्थले कर्मप्रत्ययस्य विषयत्वादिकमर्थः । तस्य च प्रत्ययार्थेऽभेदान्वयः । नामार्थयोरभेदेनान्वयबोधस्य सर्व
सम्मतत्वादिति भावः । ननु सर्वत्र सविषयकधात्वर्थे विषयितया इतरपदार्थस्यान्वयाङ्गीकारे अभञ्जनो भाजनाय यतते इति प्रयोगा
नुपपत्तिः । न दातृभोजनविषयककृत्यभावादित्यत आह । यतते इत्यादि । तथा च यतिपदार्थेति द्विक सविषयकधात्वर्थे उद्देश्य
त्वेनेति भाष्यः । अत एवेति । यातो यतिपदार्थे सर्वत्रापि विषयित्वेनेतरपदार्थान्वयो ऽत्र तु उद्देश्यत्वेनेति भावः । अत एवेति । यातो यतिपदा
र्थे उद्देश्यत्वेनैवेतरपदार्थान्वयो न तु विषयितयेतिभावः । भञ्जनानन्तरम् अपि अन्यथानन्तरं भोजनविषयककृत्यभावेन तथा
प्रयोगानुकूलव्यापारे धातोः शक्तिवादिनोऽपि पर्याप्तिरिति भावः । मतान्तरमपि पुनर्मन्मतमुपदर्शयति । धातोरर्थः फलमि
ति । तथा च फलानुकूलव्यापारे धातोः शक्तिवादिनोऽपि फले शक्तिकल्पनस्यावश्यकतया तत्रैव तत्कल्पनमुचितमिति भावः । न
न्वेवं सति गच्छतीत्यादौ संयोगरूपफलानुकूलव्यापारबोधस्यानुभवसिद्धस्य कथं निर्वाह इत्यत आह । अनुकूलव्या

याराङ्क इति। पदार्थैकदेशेऽन्वयातङ्गीकारेत्वाह। व्यापारमात्रं वेति। ननु केवलव्यापारस्याख्यातार्थत्वमग्रे वक्ष्यतीत्यादौ धात्वर्थसंयोगस्याख्यातार्थ
२३ व्यापार्यो: कथं जन्यजनकभावाभावमत आह। जन्यजनकेत्यादि। ननु सर्वत्र फलस्य धात्वर्थत्वे गम्यर्ता यजेत इत्यादौ संयोगस्वर्गादिरूपफले वर्त
मानत्वेष्टसाधनत्वादेर्भावात्तदन्वयानुपपत्तिरितिस्यत आह। लडादीत्यादि। लडाद्यर्थवर्तमानत्वादिकं लडाद्यर्थइष्टसाधनत्वादिकमित्यर्थः
23 वर्तमानत्वादीकमित्यर्थः। वर्तमानत्वादीत्यादिना भविष्यत्वादिपरिग्रहः। इष्टसाधनत्वादीत्यादिना कृतिसाध्यत्वपरिग्रहः। एकपदोपात्तत्वेति।
एकपदजन्योपस्थितिविषयत्वेत्यर्थः। तत्रैवेति। व्यापार एवेत्यर्थः। तथा चाख्यातार्थव्यापारे वर्तमानत्वादेरन्वयोगिकोरेश्वास्तेत्यर्थ वर्तमान
त्वादुपस्थितेः तदाकलयने लाघवमिति भावः। ननु धफलस्य धात्वर्थत्वे ओदनादिरूपपाककलानुभ्रनिदशायां तदनुकूलापाकादि
रूपव्यापारसत्वेपाकोभविष्यतीप्रयोगापत्तिः। तत्रानिरर्थकघञ्प्रत्ययसमाभवात्तेयाच धात्वर्थओदनादिरूपफलवर्तमानप्रागभाव
प्रतियोगित्वरूपभविष्यत्त्वस्य सत्वादित्यत आह। भावप्रत्ययस्य घञादेरिति। भावविहितस्य घञादिप्रत्ययस्येत्यर्थः। अनुकूलव्यापार एवे
ति तथा च तत्र भावविहितघञर्थता दशाव्यापारस्यासिद्धतया तत्र वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्वस्य बाधितत्वेन तथा प्रयोगा
सम्भवादिति भावः। तेनेति। भावविहितघञ्प्रत्ययस्यानुकूलव्यापारार्थकत्वेनेत्यर्थः। फलानुत्पाददशायामिति। ओदनादिरूपफलानुत्प
त्तिदशायामित्यर्थः। नादृशफलोत्पाददशायां तु तत्र वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्वस्य ओदनादिरूपफलेऽभावेन तथा प्रयोगाम
सम्भवात् स्थैवोक्तमिति। व्यापारविशेषेपाकादिरूपव्यापारव्यापारव्यादिगमेऽदत्यर्थः। पाको विद्यत इति। अत्र दत्तदायात्वर्थे ओऽदनादि २३

रूपरूपफले वर्तमानकालसंबन्धित्वरूपविद्यमानत्वसत्त्वेन तथा प्रयोगापत्तिसंभवादिति भावः। भावविहितल्युडादीनां मितपचादिय
रदमात्यघत्वपुरूपप्रत्ययस्य व्यापारार्थकत्वे युक्तिमाह। नापीत्यादि अत्र भावल्युट्प्रत्ययस्य निरर्थकत्वे संयोगरूपफलमात्रस्य गमधात्वर्थत्वस
च घटभूतलोभयवृत्तितया घटभूतलयोर्मिथो विश्लेषणाविशेषभावे विनिगमनाविरहात् प्रयोगापत्तिरुभयोरिति तस्य व्यापारार्थकत्वमावश्य
कमिति भावः। न चैवं नमते धात्वर्थतया धात्वर्थतावच्छेदकत्वाभावेन तथा लक्षणस्यासंभवदुक्तिकत्वात्। नापि परमात्रसमवेतव्यापारजन्यधा
त्वर्थफलशालित्वं तत्त्वम्। स्वात्मानं प्रयाति विहग इति प्रयोगापत्तेः। विहगस्य स्वपरोभयः स्वावयवः तत्समवेतो यः स्पन्दात्मकव्यापारः तज्जन्यधात्व
र्थसंयोगात्मकफलशालित्वादित्यत आह। प्रत्ययोपनीतेति। प्रत्ययः प्रतीतो यः परसमवेतव्यापारः तज्जन्यं यद्धात्वर्थफलं तच्छालित्वं एतत्स्म
ते कर्मत्वमित्यसमितिर्थः। तथा च विघात्मकव्यापारस्य प्रत्ययोपनीतत्वाभावेन न स्वात्मानं प्रयाति विहग इति प्रयोगप्रसङ्गः न चात्र व्यापारस्य द
वार्थमिति वाच्यम्। व्यापारत्वेन प्रत्ययोपनीतत्वस्य प्रकृते तत्सोपाधत्वात्॥ अन्यथा वर्तमानत्वादिप्रत्ययोपनीतो यः परसमवेतकालो व्या
प्तिः तज्जन्यधात्वर्थफलाशालित्वेन स्वात्मनोपि कर्मत्वसंभवेन स्वात्मानं प्रयाति विहग इति प्रसङ्गापत्तेः। न च तथापि धात्वर्थे तिव्या
र्थं गच्छतीत्यादौ पूर्वदेशस्यापि कर्मतापत्तिः। तयादिप्रत्ययोपनीतो यः फल परसमवेतव्यापारस्तज्जन्यफलाविभागः तच्छालित्वात्। तदुपाद
ने च न तथापत्तिः तस्य धात्वर्थत्वाभावादिति। अत्र परसमवेतत्वं कर्मप्रत्ययार्थः। तस्य चकाराख्यातस्थले आख्यातार्थव्यापारे तथा ख्यातस्थ
ले चान्निष्ठष्कृष्टमतेन्वतीयार्थव्यापार एवान्वयः इति परत्वं धात्वर्थे आश्रयता संबन्धेन यदन्वेति तन्निरूपकक्षया धात्वर्थो वाऽधिकरणसंबन्धे
नयत्रान्वेति तदपेक्षया च बोध्यम्। इक्षत्व। भामं गच्छतीत्यादौ ग्रामवृत्तिसंयोगरूपजनकग्रामभिन्नसमवेतव्यापारवान् चैत्रः चैत्र

गम्यमानो गम्यते इत्यत्र चैत्रं चैत्र इति ग्राम्याभिन्नसमवेतव्यापारजन्यसंयोगाश्रयो ग्राम इति बोध्यः। ननु कर्त्राख्यातकर्माख्यातयोः व्याप-
२४ रत्वरूपैकप्रकारावच्छिन्नबोधकत्वे केषांचिदेकत्र कर्तृप्रत्ययः कर्मप्रत्ययः कर्मप्रत्यय इति व्यवहार इत आह फलव्यापारयोरिति। तथा च फलस-
25 विशेषणत्वे व्यापारस्य तिङोऽर्थत्वे कर्तृप्रत्यय इति व्यवहारः। एवं फलस्य विशेष्यत्वे व्यापारस्य विशेषणत्वे तत्र कर्मप्रत्यय इति व्यवहार इति भावः।
ननु कर्माख्यातस्थले धात्वर्थफलस्य साक्षान्नामार्थेऽन्वयबोधाङ्गीकारे नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधानङ्गीकारप्रवादभङ्गप्रस-
ङ्ग इत्यत आह। वस्तुतस्त्विति। अधिकारस्तावदित्यादिग्रन्थेन तद्द्वयस्य पूर्वोक्तार्थे इत्यनेनान्वयः। ननु कर्माख्याने वक्तकर्मकृतोऽपि आ-
श्रयत्वबोधकत्वे व्यक्तस्य नामार्थेऽन्वयप्रसङ्गः। नामार्थयोर्भेदेनान्वयबोधस्यानङ्गीकारादित्यत आह। कर्मकृत इति। आश्रय इति। फल-
स्येत्यादि। कर्तृकृतो यत्नाश्रयबोधकत्वे एकाकारबोधजनकत्वरक्षार्थं आख्यातस्यापि यत्नविशिष्टाश्रयत्वलाभान्तिरत आह। कर्तृ इति। क-
र्तृकर्मणोरित्यादि। उपदर्शितोभयस्थले कर्तृकर्मणोः सह कृत्प्रत्ययार्थकर्तृकर्मणो भेदान्वयबोधे स्यात् भवति ह्यस्यानुरोध्यादित्यर्थः। ज्ञानातीता-
दियोग इति। आख्यातकर्मकर्तृकृतामपि विशेषः। पूर्वोक्तैवरीतिरिति। आश्रयत्वविषयकत्वे कर्त्राख्यातकर्माख्यातयोः आश्रयविष-
योश्च कर्तृकृत्कर्मकृतोरर्थः। स्फुटार्थ एवेत्यादि। पच्यात इत्यत्र व्यापारस्याख्यातार्थत्वाभावात् फले वर्तमानत्वान्वयबोधाङ्गीकारे
व्यापारासत्त्वदशायां फलसत्त्वदशायामपि पच्यत इत्यादिप्रयोगापत्तिः। एवं पक्व इत्यादौ आख्यातस्याभावेन तदर्थव्यापारे। तत्त्वस्य बो-
धा इति वक्तुमशक्यत्वेन धात्वर्थफलेऽतीतत्वस्यान्वये। अङ्गीकारे फलासत्त्वदशायां व्यापारसत्त्वदशायां यावत्तण्डुला इति प्रयो- राम
गानुपपत्तिरिति भावः। वर्तमानत्वादित्यादि इत्यादि। नातीतत्वादिपरिग्रहः। ननु पक्ष्यमान इत्यादौ आनशप्रत्ययार्थैकदेशे व्यापार २५

एवतदर्थवर्तमानत्वादन्वयः स्वीकर्तव्य इति तथा च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिभंगप्रसंग इत्यत आह यच्चमान
इत्यादि। तथा च प्रकृतस्थले तादृशव्युत्पत्तेः संकोचः कल्पत इति भावः। सर्वत्र तादृशव्युत्पत्तिस्वीकारे त्वाह। हस्तावेति। नन्वेवं सति तत्र व्या
याराश्रयतायाः बोधस्यानुभवसिद्धत्वस्य लोपप्रसंग इत्यत आह विशिष्टाश्रयत्वमित्यर्थः। अन्वयोपलम्भ इति। एकपदोपस्था
पितयोः। रर्थयोः परस्परमन्वयबोध्यागीवारेणाकाङ्क्षाकार्यकारणभावासिद्धस्य शाब्दबोधाविषय इत्यर्थः परस्परमन्वयबोधं तथा
च एकपदोपस्थाप्ययोः तयोः परस्परमन्वयबोधे बाधकाभावे मताहशालिविशिष्टार्थबोध्यानानुपपन्न इति भावः। न चैकपदोपस्था
प्ययोः रर्थयोः परस्परमन्वयबोधो व्युत्पत्तिसिद्धः इत्यत्र मानाभाव इत्यत आह। एवकारस्येवेति। तथा चैकपदोपस्थाप्ययोरर्थयोः
परस्परमन्वयबोध्यानंगीकारे पार्थ एव धनुर्धरः इत्यादौ यार्थव्ययोगव्यवच्छेदबोधोऽनुपपन्नः। एवकारस्यायि अन्ययोगव्यवच्छेद
च प्रत्येकशक्तिद्वयस्वीकारेणाउपदर्शितानुपपत्तिग्रस्तत्वादिति भावः। न च एवकारस्योभयत्र शक्तिर्यतो किं त्वन्ययोगमात्रे नियोगिव
त्वाविशिष्टव्यवच्छेद एव। तथा च तोपदर्शितान्वयबोधोऽनुपपन्न इत्यत आह॥ अन्ययोगेत्यादि। अन्ययोगप्रतियोगिकत्वाविशिष्टव्यव
च्छेदमात्रस्येत्यर्थः। अतिप्रसक्तत्वादिति। सर्वसाधारणत्वादित्यर्थः। तथा च पार्थ एव धनुर्धर इत्यादिवत् चैत्र एव धनुर्धर इत्यादिप्र
योगापत्तिः॥ चैत्रान्ययोगघटितव्यवच्छेदस्य चैत्रान्ययोगप्रतियोगिकस्य धनुर्धरस्याविद्यमानत्वादिति भावः। नन्वयोगत्वावच्छिन्न
प्रतियोगिताकव्यवच्छेद एव एवकारशक्यः। तथा च न चैत्र एव धनुर्धर इत्यादिप्रयोगः पार्थरूपधनुर्धरे चैत्रान्ययोगस्याविद्य
मानतया धनुर्धरत्वावच्छेदेन चैत्रान्ययोगत्वावच्छिन्नाभावसत्त्वादतस्तत्र दोषमाह। अन्ययोगत्वावच्छिन्नेत्यादि॥ अन्ययोगत्वावच्छि

न्नप्रतियोगिताकव्यवच्छेदस्य शक्यत्वे अन्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकन्यवच्छेदस्य शक्यत्वे।। शक्याप्रसिद्धिः। पार्थ एव धनुर्द्धर इत्य
२५ दौ अन्यसमवेतत्वत्वावच्छिन्नाभावरूपशक्याप्रसिद्धिदोषो न संभवति। असमवेतत्वस्य प्रसिद्धिसंभवात्तत्र दोषमाह बाधितत्वं चेति।। पृथिव्या
मेव गन्ध इत्यादौ गन्धे अन्यसमवेतत्वाभावस्य बाधितत्वं चेत्यर्थः। ननु तत्र गन्धे अन्यासमवेतत्वव्यवच्छेदस्य बाधितत्वेऽपि पृथिव्यन्यसमवेतत्वा
25 भावस्य तत्राबाधितत्वेन बोध्यसंभवात्। एवं च पार्थ एव धनुर्द्धर इत्यादौ अन्यतादात्म्याप्रसिद्धावपि पार्थान्यतादात्म्यत्वावच्छिन्नप्रसिद्धिसंभवे
न बोधसंभवाद्दतो दूषणात्। तस्माहाह पार्थ एवेत्यादाविति। तस्य पार्थान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य तातोन्यत्वात् एव
कारशक्यतावच्छेदकावच्छिन्नाभिन्नत्वात्। शक्यतावच्छेदकावच्छिन्नासैव यद्धनुर्द्धरस्थितिसंभवेन एवकारस्य सार्थक्यान्नतादात्म्यव्यवच्छे
दस्य प्रत्ययासंभवादिति भावः। ननु स्वान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकाभावादौ एवकारस्य शक्तिः कल्पनीया।। अत्र स्वपदयरुपसमभि
व्याहृतविभक्तिसमभिव्याहृत एवकारः श्रुनश्चकृयतं तथा च नोपदर्शितानुपपत्तिस्तत्र दोषमाह। स्वान्येत्यादि। स्वित्वस्याननुगमात्पार्थ इत्या
वादित्वसाधारणानुगतस्य स्वत्वस्याभावात्पार्थान्यव्यवच्छेदादौ एवकारस्य नानाशक्तिकल्पने गौरवान्नन्तशक्तिकल्पना
भिया उपदर्शितप्रकारेणादरणीय इति भावः। नन्वेकारस्यान्ययोगव्यवच्छेदे क्षणनाशकिवादिमते कथं यथा पार्थ एव धनुर्द्धर इ
त्यादौ पार्थान्यतादात्म्यव्यवच्छेद इत्यत आह। तस्मादित्यादौ। दि। यथा नीलो घटो नास्तीत्यादौ घटत्वावच्छिन्ने नीलस्यान्वयेन घटत्वावच्छि
न्नो भावः प्रतीयते तथा पार्थ एवेत्यादौ एवकारार्थ अन्यैकदेशे भेदे पार्थस्यान्वयेन। अन्ययोगो अन्ययेन योगस्य व्यवच्छेदः अन्यपदेन पार्थान्यतादा राम
त्म्यव्यवच्छेदः प्रतीयत इति समुदितग्रन्थार्थः। ननु कथं तत्पदार्थव्यापाराश्रयैकदेशे व्यापारे वर्तमानमत्ताघन्वयस्वीकारे मंडनमते पदार्थः पदा २५

धौनावेच्चेतितत्तुपदार्थैकदेशोद्गतिस्तुतातिसंकोच एव दोषः॥ व्यापाराश्रयः ययोः तस्य नाशात्कपत्वे चानंतशक्तिकल्पनप्रसंगात्तत आह। समान
वेति। तथा चाख्यातस्य कृतित्वेन कृतौ शक्तिवादिनापि कर्तृकर्दर्थकृत्याश्रयैकदेशे कृतौ वर्तमानत्वादेरन्वयाभ्युपगमे ऽयदर्शितव्युत्पत्तिभ
ंगः कर्तृकृतः कृतौ आश्रये च शक्तिद्वयस्वीकारे ऽनंतशक्तिकल्पनाप्रसंगो ऽवश्यमभ्युपेय इति मतद्वयमिति भावः। नन्वाख्यातकर्तृमौ
ः व्यापारजन्यदाश्रययोः शक्यत्वसंयुज्यते युक्त इत्यादावापि तथैव कर्मव्यतया युक्तधातोः सकर्मकत्वापत्तिः प्रत्ययोपनीतत्वानुकूलव्या
पारजन्यफलशालित्वरूपकर्मत्वस्य तत्र वक्षादौ संभवादित्यत आह। धात्वर्थेत्यादि। मया च तत्र प्रत्ययस्य व्यर्थकत्वे तथाविधव्यापारविरहिणि
वृक्षे नाहृशप्रत्ययानुपपत्तिरिति भावः। ननु अदृष्टवदात्मसंयोगादिरूपव्यापारस्य तत्र वृक्षे सर्वदा सत्वेन तत्र कथाविधव्यवहारविरह एवाप्र
सिद्ध इति संयुज्यत इत्यादौ प्रत्ययस्य व्यापारार्थकत्वेनोक्तानुपपत्तिरतो दूषणांतरमाह। संयोगमात्रप्रतीतेश्चेति। मात्रपदेन व्यापारव्यवच्छेदः
। तथा च तत्र व्यापारस्याप्रतीयमानत्वादिति भावः। असकर्मकत्वमिति। व्यापारस्य प्रत्ययोपनीयत्वाभावेन प्रत्ययोपनीततादृशव्यापारजन्यफल
शालित्वरूपकर्मत्वस्य तत्र वृक्षाद्यभावान्न कर्मत्वमिति भावः। ननु नघञो व्यापारार्थकत्वे भावे घञ् इत्यनुशासनविशेषः। तादृशासने
। नघञ्प्रयोगसाधुतामात्रप्रतीतेरत आह। संयोग इत्यादाविति॥ तथा च तादृशानुशासनमेतत्पक्षलाभिप्रायेकमिति न दोष इति भावः। तन्ने
त्यादि। तत्र लक्षणया तादृशानुभवोपपादनेन तु लाघवात्फलत्वमेवाख्यातशक्यतावच्छेदकयुक्तमिति भावः। मंडनमते दोषांतरमाह। फलेति
। तद्वाच्यानुकूलासाधारणो व्यापाराभाववति गुरुस्वेयचतीत्यादिप्रयोगप्रसंगो मंडनमते दुर्वार इति भावः। ननु साधारणज्ञानकाव्याश्रय
व्यापारस्याख्यातार्थत्वेनोक्तदोष इत्यत आह। विभागादीति। चलतीत्यादिष्टयतिः संभवतीत्यतो निश्चलेति। प्रकारमतमुपन्यस्य तत्र दूषणमा

२६ हात्रत्यादिना।।ननु नगच्छतीत्यादौ।।तत्कालेति।संयोगविभागादीत्यर्थः।क्वचिदाश्रयत्वात्स्किमयीतिभावाख्यातस्थले आश्रयत्वादरमा
वात्क्वचिदिति।प्रसंगादिति।लक्षणादिनातादृशानुभवोपपादनतु लाघवमेव शरणीकरणीयत्वादिति भावः।। छ छ।।।। इतिश्रीरघु
२६ देवभट्टाचार्यविरचिताख्यातवादटिप्पणं समाप्तं।। छ।। छ।। कटिलाख्यातवादेषु ममममय विलोकनैः।लीलयाध्यायनधीरः कुर्वन्नुन्निहि
ता अपि।।१।।आख्यातवादसंख्याख्या समुद्भूते श्रमे मम।।श्रीरामानुजगतीनार्थः श्यामसुंदरविग्रहः।।२।।६।।श्रीकृष्णाचार्यगुरुभ्यो नमः।।

म

१०००

राम
२६